[४.] अर्धपूर्वपदश्च[1] पूरणप्रत्ययान्तः सङ्ख्यासञ्ज्ञो भवतीति वक्तव्यं समासकन्विध्यर्थम् । (म.भा. १.८२)

[2]अर्धपञ्चमशूर्पः । [3]अर्ध पञ्चमं येषामिति बहुव्रीहौ कृते अर्धपञ्चमैः शूर्पैः क्रीतः । तद्धितार्थेति (२.१.५१/७२८) समासः । तत्र 'दिक्सङ्ख्ये सञ्ज्ञायाम्' (२.१.५०/७२७) इत्यनुवृत्तेस्ततः सङ्ख्यापूर्वस्य द्विगुसञ्ज्ञायां (२.१.५२/७३०) 'शूर्पादञन्यतरस्याम्' (५.१.२६/१६९१) इति अञ् ठञ्च । 'अध्यर्धपूर्वद्विगोर्लुगसञ्ज्ञायाम्' (५.१.२८/१६९३) इति लुक् । [4]अर्धपञ्चमकः (५.१.२२/१६८७) । सङ्ख्याप्रदेशाः–[5]'सङ्ख्या वंश्येन' (२.१.१९/६७३) इत्येवमादयः ॥

## ष्णान्ता षट् । (२४/३६९)

स्त्रीलिङ्गनिर्देशात् सङ्ख्या इति सम्बध्यते । [6]षकारान्ता नकारान्ता च या सङ्ख्या सा षट्सञ्ज्ञा भवति । षकारान्ता तावत्—षट् तिष्ठन्ति । षट् पश्य[7] । नकारान्ताः–पञ्च । सप्त । नव[8] । दश । [9]अन्तग्रहणमौपदेशिकार्थम् । [10]तेनेह न भवति—शतानि, सहस्राणि । [11]अष्टानाम् इत्यत्र [12]नुड् भवति (७. १. ५५/३३८) । [13]षट्प्रदेशाः—'षड्भ्यो लुक्' (७.१.२२/२६१) इत्येवमादयः ॥

## डति च । (२५/२५९)

डत्यन्ता [14]या सङ्ख्या सा[15] षट्सञ्ज्ञा भवति । कति तिष्ठन्ति । [16]कति पश्य ॥

## क्तक्तवतू निष्ठा । (२६/३०१२)

क्तश्च क्तवतुश्च [17]क्तक्तवतू प्रत्ययौ निष्ठासञ्ज्ञौ भवतः । कृतः । कृतवान्[18] । भुक्तः[19] । भुक्तवान् । ककारः [20]कित्कार्यार्थः । उकारः [21]उगित्कार्यार्थः । निष्ठाप्रदेशाः—'श्वीदितो निष्ठायाम्' (७.२.१४/३०३९) इत्येवमादयः ॥

## सर्वादीनि सर्वनामानि । (२७/२१३)

सर्वशब्दः आदिर्येषां [22]तानीमानि सर्वादीनि सर्वनामसञ्ज्ञानि भवन्ति । सर्वः, सर्वौ, सर्वे (७.१.१७/२१४) । सर्वस्मै (७.१.१४/२१५) । सर्वस्मात् (७.१.१५/२१६) । सर्वेषाम्[23] (७.१.५२/२१७) । सर्वस्मिन् (७.१.१५/२१६) । सर्वकः (५.३.७१/२०२६) । [24]विश्वः, विश्वौ, विश्वे । विश्वस्मै । विश्वस्मात् । विश्वेषाम् । विश्वस्मिन् । विश्वकः ।

---

1. अर्धपूर्वस्य पूरणप्रत्ययान्तस्य फ. 2. समास इत्यधिकं फ. 3. अर्ध—लुक् नास्ति ब. क. ड. फ. 4. कन् इत्यधिकम् फ, सङ्ख्याया अतिशदन्तायाः (५.१.२२/१६८७) इति कन् ड. 5. संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् (५.४.१७/२०८५) अ.क. 6. षकारनकारान्ता संख्या फ.ह. 7. पश्यन्ति फ, षड् वा प्राश्य ब. 8. नव नास्ति ह, सप्त नास्ति क. 9. अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम् फ, अन्तग्रहणं किम्? औपदेशिकार्थम् क. ड. 10. तेन नास्ति ग. फ. 11. वाक्यमिदं नास्ति फ. 12. तु इत्यधिकम् ग. 13. वाक्यमिदं नास्ति फ. 14. च इत्यधिकम् क. ड, डत्यन्ता संख्या ग. 15. सा नास्ति ह. 16. कति पश्य नास्ति ग. ड. फ. 17. क्तक्तवतू नास्ति ग. 18. वीतः वीतवान् फ, कृतं कृतवत् क. ई. 19. भुक्तं ड, नास्ति क. ई. 20. किदर्थः अ. 21. उगिदर्थः अ. 22. तानि सर्वादीनि शब्दरूपाणि ह. 23. नास्ति क.फ. 24. विश्वः, विश्वौ, विश्वेषाम्, विश्वस्मिन् न सन्ति ड. फ.